पञ्चकालप्रकाशः

श्रीमते निगमान्त महादेशिकाय नमः ।

अग्निसन्धानप्रयोगः

-----

पादौ प्रक्षाळ्य । द्विराचम्य । सपवित्रपाणिः, दक्षिणाताम्बूलाक्षतान् गृहीत्वा – "ओं नम॒स्सदसे॒ नम॒स्सद॑स॒स्पत॑ये॒ नम॒स्सखी॑नाम्पुरो॒गाणा॒ञ्चक्षु॑षे॒ नमो॑ दि॒वे नमः॑ पृथि॒व्यै ॥ सप्र॑थ स॒भाम्मे॑ गोपाय । ये च॒ सभ्याः॑स्सभा॒सदः । तानि॑न्द्रि॒याव॑तः कुरु । सर्व॒मायु॒रुपा॑सताम् ॥ सर्वेभ्यः श्रीवैष्णवेभ्यो नमः" इति ब्राह्मणान् अक्षतैरभ्यर्च्य; दक्षिणाताम्बूलन्दत्वा, प्रणम्य –

"स्वामिनः भवत्पादमूले मया समर्पितां इमां यत्किंचिद्दक्षिणां यथोक्तदक्षिणात्वेन स्वीकृत्य आवयोर्विच्छिन्नौपासनाग्निसन्धानं कर्तुं योग्यतासिद्धिरस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु" इति प्रार्थ्य ।

"तथास्तु, योग्यतासिद्धिरस्तु" इति प्रत्युक्ते,

दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः त्रिः प्राणानायम्य ।

"श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे । वृणीमहे च तत्राद्यौ दम्पती जगताम्पती ॥

स्वशेषभूतेन मया स्वीयैः सर्वपरिच्छदैः । विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम् ॥

"हरिरोन्तत् श्रीगोविन्द गोविन्द इत्यादि "अस्यां शुभतिथौ श्रीभगवदाज्ञया भगवत्प्रीत्यर्थम् औपासनाग्निमाधास्यामि, विच्छिन्नसन्धानार्थम्" - इति सङ्कल्प्य - पत्न्यर्थं पुनः प्राणानायम्य - सङ्कल्प्य - "कृतश्च" इत्यनुसन्धाय । बलमन्त्रमनुसन्धाय, सात्विकत्यागङ्कृत्वा ।

यत्राग्निस्थापनं तत्र दक्षिणारम्भमुदगपवर्गं (*अपवर्गः - समाप्तिः) प्राचीस्तिस्रो रेखाः, पश्चिमारम्भं प्रागपवर्गमुदीचीस्तिस्रो रेखाश्च, अङ्गुष्ठानामिकाभ्यां सङ्गृहीतेन दर्भेण, शकलेन वा लिखित्वा, तत्र तन्न्यस्य - अद्भिरवोक्ष्य - तृणन्नैर्ऋत्यान्निरस्य - अप उपस्पृश्य - श्रोत्रियागारादग्निमाहृत्य - व्याहृतिभिः प्रतिष्ठाप्य - अवोक्षणशेषमुत्सिच्य - अन्यत्तोयमापूर्य - यथा परिस्तरणाद्बहिः स्यात्तथा प्रागुदग्वा निधाय । यज्ञियैरिन्धनैरग्निं प्रज्वाल्य - परिसमूह्य - प्रागुदग्वा षोडशषोडश दर्भान् अग्नेः प्रागादि प्रदक्षिणं परिस्तीर्य । दक्षिणानुत्तरान्, उत्तरानधरान् कुर्यात् - इन्धनानन्तरं परिस्तरणमेव कार्यं । न तु तयोर्मध्ये अवश्यकर्तव्य-कर्मार्थसम्भारोपकल्पनादिकमपि । उत्तरेणाग्निं प्रागग्रान् दर्भान् संस्तीर्य - तेषु, द्वेद्वे, अधोबिलानि पात्राणि प्रयुनक्ति । प्रधानदर्व्या सह आज्यस्थालीं, उपदर्व्या सह वैकङ्कतीं प्रोक्षणीं च सादयित्वा । ("पवित्रयोस्संस्कारः, आयामतः परीमाणं, प्रोक्षणीसंस्कारः, पात्रप्रोक्ष, इति दर्शपूर्णमासवत्तूष्णीं") । समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते, तृणं काष्ठं वा अन्तर्धाय च्छिनत्ति न नखेन, ततोऽप उपस्पृश्य, मूलादारभ्य आग्रादद्भिरुन्मृज्य, पवित्रे कृत्वा - पात्राणि संस्पृश्य - प्रोक्षणीमादाय अपरेणाग्निन्निधाय - उदगग्राभ्यां पवित्राभ्यामन्तर्हितायामप आनीय । उत्तानयोः

प्रागग्रयोः, पाण्योरङ्गुष्ठानामिकाभ्यां पवित्रमूलाग्रे गृहीत्वा उदगग्राभ्यां पवित्राभ्यां त्रिरुत्पूय । पात्राण्युत्तानानि कृत्वा सपवित्रेण पाणिना सर्वाभिरद्भिः त्रिः प्रोक्ष्य प्रोक्षणीपात्रे अन्यजलं पूरयित्वा । दक्षिणत उद्वास्य - पवित्रमाज्यस्थाल्यान्निधाय । विलीनमप्याज्यं होमाग्नौ कर्मार्थं पुनर्विलाप्य - अपरेणाग्निं पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यन्निरूप्य - परिस्तरणपात्रसादनयोर्मध्ये उदीचोऽङ्गारान् निरूह्य, तेष्वाज्यमधिश्रित्य - ज्वलता एकेन तृणेनावद्योत्य - द्वे दर्भाग्रे (मधुगन्धरसौ नाम राक्षसावाज्यहारिणौ । तयोर्निरसनार्थाय द्वे दर्भाग्रे विनिक्षिपेत् ॥) अनियतायामे तृणं काष्ठं वा अन्तर्धाय प्रच्छिद्य । अप उपस्पृश्य, युगपदाज्यपात्रे प्रत्यस्य - अधोमुखाभ्यां ज्वलद्भ्यां तृणाभ्यां त्रिः पर्यग्नि कृत्वा - उदगुद्वास्य । अङ्गारानग्नौ प्रत्यूह्य, दर्भास्तृते पश्चिमे निधाय । उदगग्राभ्यां पवित्राभ्यां पुनराहारं प्रागारम्भं प्रागपवर्गं त्रिरुत्पूय । पवित्रग्रन्थिं विस्रस्य अप उपस्पृश्य युगपदेव प्रागग्रमग्नौ प्रहरति - येन जुहोति तदग्नौ प्रतितप्य, दर्भैस्संमृज्य, पुनः प्रतितप्य, प्रोक्ष्य, दर्व्यौ निधाय, दर्भानद्भिस्संस्पृश्य अग्नौ प्रहरति - "ओम् अदि॒तेऽनु॑मन्यस्व" इति दक्षिणतः प्राचीनम्, "ओम् अनु॑म॒तेऽनु॑मन्यस्व' इति पश्चादुदीचीनम्, ओं सर॑स्व॒तेऽनु॑मन्यस्व' इति उत्तरतः प्राचीनम्, "ओं देव॑ सवितः॒ प्रसु॑व" इति प्रागारभ्य प्रदक्षिणं, समन्ततोऽग्निं परिषिच्य - प्रधानदर्व्या चतुर्गृहीतेनाज्येन "ओं भूर्भुव॒स्सुव॒स्स्वाहा॓" इति हुत्वा 'प्रजापतय इदं' इत्युद्देशत्यागं कृत्वा, "अना॓ज्ञातँ॒य्यदाज्ञा॑तम् । य॒ज्ञस्य॑ क्रि॒यते॒ मिथु॑ । अग्ने॒ तद॑स्य कल्पय । त्वꣳ हि वेत्थ॑ यथात॒थं स्वाहा॓ । अग्नय इदं", "पुरु॑षसम्मितो य॒ज्ञः । य॒ज्ञꣳ पुरु॑षसम्मितः । अग्ने॒ तद॑स्य कल्पय । त्वꣳ हि वेत्थ॑ यथात॒थं स्वाहा॓ - अग्नय इदं", "यत्पा॑क॒त्रा मन॑सा दी॒नद॑क्षा॒ न । य॒ज्ञस्य॑ म॒न्वते॒ मर्ता॑सः । अ॒ग्निष्टद्धोता॓ क्रतु॒विद्वि॑जा॒नन्न् । यजि॑ष्ठो दे॒वाꣳ ऋ॑तु॒शो य॑जाति॒ स्वाहा॓ । अग्नय इदं" । प्राणानायम्य - "श्रीभगवदाज्ञया भगवत्प्रीत्यर्थम् अग्न्यनुतिप्रायश्चित्तार्थम् अयाश्च होमं करिष्ये' इति सङ्कल्प्य - अ॒याश्चा॒ग्नेऽस्य॑नभिश॒स्तीश्च॑ स॒त्यमि॑त्त्वम॒या अ॑सि । अय॑सा॒ मन॑सा धृ॒तोऽयसा॑ ह॒व्यमू॑हिषे॒ऽया नो॑ धेहि भेष॒जं स्वाहा॓ । अग्नये अयस इदं" ("पुन॑स्त्वादि॒त्या रु॒द्रा वस॑व॒स्समि॑न्धता॒-म्पुन॑र्ब्र॒ह्माणो॑ वसुनीथ य॒ज्ञैः । घृ॒तेन॒ त्वन्त॒नुवो॑ वर्धयस्व स॒त्यास्स॑न्तु॒ यज॑मानस्य॒ कामा॒स्स्वाहा॓ । अग्नये वसुनीथायेदं" - "मनो॒ ज्योति॑र्जुषतामा॒ज्यँ॑विच्छि॑न्नँ॒य्य॒ज्ञꣳ समि॒मन्द॑धातु । या इ॒ष्टा उ॒षसो॑ नि॒म्रुच॑श्च॒ तास्सन्द॑धामि ह॒विषा॑ घृ॒तेन॒ स्वाहा॓ - मनसे ज्योतिष इदं" । "यन्म॑ आ॒त्मनो॑ मि॒न्दाभू॑द॒ग्निस्तत्पुन॒राहा॓-र्जा॒तवे॑दा॒ विच॑र्षणि॒स्स्वाहा॓ - अग्नये जातवेदस इदं" - "पुन॑र॒ग्निश्चक्षु॑रदा॒त्पुन॒रिन्द्रो॒ बृह॒स्पतिः॑ । पुन॑र्मे अश्विना यु॒वञ्चक्षु॑रा धत्तम॒क्ष्योस्स्वाहा॓ । अग्नीन्द्राबृहस्पत्यश्विभ्य इदं" - "तन्तुं॑न्त॒न्वन्रज॑सो भा॒नुमन्वि॑हि॒ ज्योति॑ष्मतः॒ प॒थो र॑क्ष धि॒या कृ॒तान् । अ॒नु॒ल्ब॒णँव॑यत॒ जोगु॑वा॒मपो॒ मनु॑र्भव ज॒नया॒ दैव्य॒ञ्जन॒ं स्वाहा॓ - अग्नये तन्तुमत इदं"।)

प्राणानायम्य । "श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं मन्त्रतन्त्रदेवताविपर्यास न्यूनातिरेक स्वराक्षरभ्रेषप्रायश्चित्तार्थं सर्वप्रायश्चित्ताहुतीर्होष्यामि प्राणायामं च करिष्ये" । "ओंभूर्भुव॒स्सुव॒स्स्वाहा॓ । प्रजापतय इदं' । 'अना॓ज्ञातँ॒य्यदाज्ञा॑तम् । य॒ज्ञस्य॑ क्रि॒यते॒ मिथु॑ । अग्ने॒ तद॑स्य कल्पय । त्वꣳ हि वेत्थ॑ यथात॒थं स्वाहा॓ । अग्नय इदं" "पुरु॑षसम्मितो य॒ज्ञः । य॒ज्ञꣳ पुरु॑षसम्मितः । अग्ने॒ तद॑स्य कल्पय । त्वꣳ हि वेत्थ॑

यथा॒त॒थं स्वाहा᳚ - अग्नय इदं", "यत्पा॑क॒त्रा मन॑सा दी॒नद॑क्षा॒ न । य॒ज्ञस्य॑ म॒न्वते॒ मर्ता॑सः । अ॒ग्निष्टद्धोता᳚ क्रतु॒विद्वि॑जा॒नन्न् । यजि॑ष्ठो दे॒वाꣳ ऋ॑तु॒शो य॑जाति॒ स्वाहा᳚ । अग्नय इदं" ।, ”त्वन्नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॒ हेडोऽव॑ यासिसीष्ठाः । यजि॑ष्ठो॒ वह्नि॑तम॒श्शोशु॑चानो॒ विश्वा॒ द्वेषाꣳ॑सि॒ प्र मु॑मुग्ध्य॒स्मत्स्वाहा᳚ । अग्नीवरुणाभ्यामिदं" । "स त्वन्नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ । अव॑ यक्ष्व नो॒ वरु॑ण॒ꣳ॒ ररा॑णो वी॒हि मृ॑डी॒कꣳ सु॒हवो॑ न एधि॒ स्वाहा᳚, अग्नीवरुणाभ्यामिदं" । "ओं भूस्स्वाहा᳚, अग्नय इदं"। 'ओं भुव॒स्स्वाहा᳚, वायव इदं”। 'ओꣳ सुव॒स्स्वाहा᳚, सूर्यायेदं" । 'ओं भूर्भुव॒स्सुव॒स्स्वाहा᳚, प्रजापतय इदं"। "श्रीविष्ण॑वे॒ स्वाहा᳚, विष्णवे परमात्मन इदं" । प्राणानायम्य । 'ओं अदि॒तेऽन्व॑मꣴस्थाः, ओं अनु॑म॒तेऽन्व॑मꣴस्थाः, ओं सर॑स्व॒तेऽन्व॑मꣴस्थाः, ओं देव॑ सवितः प्रासा॑वीः" इति पूर्ववत् परिषिच्य -

भगवानेव स्वनियाम्य स्वरूपस्थितिप्रवृत्ति स्वशेषतैकरसेन मया स्वकीयैश्चोपकरणैस्स्वाराधनैक प्रयोजनाय परमपुरुषस्सर्वशेषी स्वशेषभूतमिदं विच्छिन्नौपासनाग्निसन्धानाख्यं कर्म स्वस्मै स्वप्रीतये स्वयमेव कारितवान्" इति सात्विकत्यागं कृत्वा "कृतश्च करिष्यामि भगवन्नित्येन भगवत्प्रीत्यर्थेन महाविभूति चातुरात्म्य भगवद्वासुदेव पादारविंदार्चनेन विच्छिन्नौपासनाग्निसन्धानाख्येन भगवत्कर्मणा भगवान् प्रीयतां वासुदेवः" इति कृतं कर्म भगवते समर्पयेत् ।

पुनः प्राणानायम्य । “श्रीभगवदाज्ञया भगवत्प्रीत्यर्थम् अनेककाल सायंप्रात्तराहुतीनामकरण प्रायश्चित्तार्थं प्राजापत्य कृच्छ्र प्रतिनिधि यत्किंचिद्धिरण्यदानं करिष्ये इति सङ्कल्प्य –

”हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदं अदश्शान्तिं प्रयच्छ मे ॥"

इदम् अनेककाल सायंप्रातराहुतीनाम् अकरण प्रायश्चित्तार्थं प्राजापत्यकृच्छ्रप्रतिनिधि यत्किंचिद्धिरण्यं नानागोत्रेभ्यः श्रीवैष्णवेभ्यस्संप्रददे न मम" इति दत्वा,

पुनः प्राणानायम्य "श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं आज्यसहितहोमद्रव्य तण्डुलदानं करिष्ये" इति संकल्प्य,

'तण्डुला वैश्वदेवत्याः पाकेनान्नं पचन्ति ये । तस्तात्तण्डुलदानेन अदश्शान्तिं प्रयच्छ मे ॥

इदं आज्यसहितहोमद्रव्य तण्डुलं यस्मैकस्मैचित् श्रोत्रियाय श्रीवैष्णवाय संप्रददे न मम" इति दत्वा ।

अग्निसन्धानप्रयोगस्समाप्तः ।

------------

अथ औपासनहोमः ।

पुनः प्राणानायाम्य - "श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं पूर्वेद्युस्सायमौपासनहोमम् अद्य प्रातरौपासनहोमं च होष्यामि" इति सङ्कल्प्य । "कृतश्च करिष्यामि ... पूर्वेद्युस्सायमौपासनहोमेन अद्य प्रातरौपासनहोमेन च भगवन्तं वासुदेवमर्चयिष्यामि" इति सङ्कल्प्य - बलमन्त्रमनुसन्धाय - "भगवानेव ... कारयति" इति सात्विक त्यागं कृत्वा (* अत्र “च॒त्वारि॒ शृङ्गा॒ त्रयो॑ अस्य॒ पादा॒ द्वे शी॒र्षे स॒प्त हस्ता॑सो अ॒स्य । त्रिधा॑

ब॒द्धो वृ॑ष॒भो रो॑रवीति म॒हो दे॒वो मर्त्या॒१॒ँ॒ आवि॑वेश ।" इत्यग्निप्रार्थनस्य, "अग्नये नमः, जातवेदसे नमः, सहोजसे नमः, अजिराप्रभवे नमः, वैश्वानराय नमः, नर्यापसे नमः, पङ्क्तिराधसे नमः, विसर्पिणे नमः", इत्यादिमन्त्रैरग्न्यलंकरणस्य च, आपस्तंब, सुदर्शनाचार्य, आण्डपिळ्ळै, वैदिकसार्वभौमादिभिरनुक्तत्वान्न कर्तव्य इति केचिद्वदन्ति ।) । वामहस्तेन पात्रं स्पृशन् दक्षिणेन पाणिना दक्षिणतः "ओं अदि॒तेऽनु॑-मन्यस्व" इति प्रागपवर्गं, पश्चिमे "ओं अनु॑म॒तेऽनु॑मन्यस्व" इति उदगपवर्गं, उत्तरतः, "ओं सर॑स्व॒तेऽनु॑मन्यस्व' इति प्रागपवर्गं, "ओं देव॑ सवितः॒ प्रसु॑व' इति प्रागारभ्य प्रदक्षिणं समन्ततोऽग्निं परिषिच्य, एकां समिधमाधाय । पत्नीहस्तं प्रोक्ष्य, तण्डुलं प्रदाय । पुनः प्रोक्ष्य - अर्धांशं गृहीत्वा, तं द्वेधा विभज्य, अग्निमध्ये "ओम् अ॒ग्नये॒ स्वाहा॑, अग्नय इदं" - उत्तरार्ध पूर्वार्धे "ओम् अ॒ग्नयै॑ स्विष्ट॒कृते॒ स्वाहा॑ - अग्नये स्विष्टकृत इदं' इति दक्षिणहस्तेन देवतीर्थेन हुत्वा एकां समिधमाधाय, अन्यमर्धं गृहीत्वा, द्वेधा विभज्य, ओं सूर्या॑य॒ स्वाहा॑, सूर्यायेदं" - "ओं अ॒ग्नयै॑ स्विष्ट॒कृते॒ स्वाहा॑ - अग्नये स्विष्टकृत इदं" । इति पूर्वनिर्दिष्टस्थाने पूर्ववद्धुत्वा, आहुतिसंसर्गे सति "आहुति संसर्ग प्रायश्चित्तार्थं वनस्पतिहोमं करिष्ये' इति संकल्प्य । "यत्र॒ वेत्थ॑ वनस्पते दे॒वानां॒ गुह्या॒ नामा॑नि । तत्र॑ ह॒व्यानि॑ गामय॒ स्वाहा॑ - वनस्पतय इदं", पुनः एकाँ समिधमाधाय । "ओम् अदि॒तेऽन्व॑मँस्थाः, ओम् अनु॑म॒तेऽन्व॑मँस्थाः, ओं सर॑स्व॒तेऽन्व॑मँस्थाः, ओं देव॑ सवितः॒ प्रासा॑वीः" इति पूर्ववत्परिषिच्य । 'ओं (श्री)विष्ण॑वे॒ स्वाहा॑, विष्णवे परमात्मन इदं" इति पूर्णाहुतिं हुत्वा ।

तण्डुले सम्यक् श्रिते सति - उत्थाय । "अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि देव व॒युना॑नि वि॒द्वान् । यु॒यो॒ध्य॑स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठान्ते॒ नम॑उक्तिँविधेम ॥" इत्युपस्थाय । "अग्नये नमः,
मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतन्तु मया देव परिपूर्णं तदस्तु ते ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥"
प्रणम्य । अभिवाद्य । आचम्य -
"भगवानेव स्वनियाम्य स्वरूपस्थितिप्रवृत्तिस्वशेषकतैकरसेन मया स्वकीयैश्चोपकरणैस्स्वाराधनैक प्रयोजनाय परमपुरुषस्सर्वशेषी स्वशेषभूतमिदं पूर्वेद्युस्सायमौपासनहोमेन सह अद्य प्रातरौपासनहोमाख्यं कर्म स्वस्मै स्वप्रीतये स्वयमेव कारितवान्" इति सात्विकत्यागं कृत्वा ।
'कृतश्च करिष्यामि भगवन्नित्येन भगवत्प्रीत्यर्थेन महाविभूतिचातुरात्म्य, भगवद्वासुदेव पादारविन्दार्चनेन पूर्वेद्युस्सायमौपासनहोमेन सह अद्य प्रातरौपासनहामाख्यं कर्म स्वस्मै स्वप्रीतये स्वयमेव कारितवान्" इति कृतं कर्म भगवते समर्पयेत् ॥

औपासनहोमस्समाप्तः ॥

-----------------